# শ্রীযাদগিরি লক্ষ্মীনৃসিংহ মঙ্গলাশাসনম্

{॥ শ্রীযাদগিরি লক্ষ্মীনৃসিংহ মঙ্গলাশাসনম্ ॥}

শ্রী যাদগিরি শৃংগাগ্র গুহামধ্য বিহারিণে

সর্বলোকেশ্বরাযাস্তু শ্রী নৃসিংহায মঙ্গলম্ ॥ ১ ॥

বামাঙ্ক বিলসল্লক্ষ্মীবংধবে লোকবংধবে

সূরিভোগ্যায যাদাদ্রি শ্রী নৃসিংহায মঙ্গলম্ ॥ ২ ॥

শঙ্খ চক্র প্রভামধ্য রাজদ্বিমলমূর্তযে

শ্রী যাদগিরিবাসায শ্রী নৃসিংহায মঙ্গলম্ ॥ ৩॥

গুহানিবসনাৎসর্ব হৃদ্গুহাবাস সূচনম্

কুর্বতে সর্বলোকানাম্ যাদাদ্রীশায মঙ্গলম্ ॥ ৪॥

নিত্যায নিরবদ্যায নিত্যবৈভবশালিনে

নিত্যবৈভব দাত্রেচ শ্রী নৃসিংহায মঙ্গলম্ ॥ ৫॥

সাধুলোক শরণ্যায কামিতার্ত প্রদাযিনে

আর্তার্তি হরণাযাস্তু শ্রী নৃসিংহায মঙ্গলম্ ॥ ৬॥

ভুক্তিমুক্তি প্রদাত্রেচ শক্তি ভক্তি প্রদাযিনে

নির্বাণ সুখরূপায শ্রী নৃসিংহায মঙ্গळম্ ॥ ৭॥

জগৎকর্ত্রে জগৎেভাক্তে জগদ্রূপায বেদসে

জগতাংচ নিবাসায যাদাদ্রীশায মঙ্গळম্ ॥ ৮॥

অনেক কোটি ব্রহ্মাণ্ডেঽৈঃ কংদুকা ক্রীডলীলযা

কেळীবিলাসলোলায শ্রী নৃসিংহায মঙ্গळম্ ॥ ৯॥

সুরাসুর নরানাম্ চ বানরানাম্ চ পক্ষিনাম্

দীনানাম্ রক্ষকাযাস্তু শ্রী নৃসিংহায মঙ্গळম্ ॥ ১০॥

দুস্টানাম্ নিগ্রহম্ চৈব্ শিষ্টানাম্ পরিপালনম্

যুগপত্ কুর্বতে লক্ষ্মীনরসিংহায মঙ্গळম্ ॥ ১১॥

প্রপঞ্চ বৃক্ষবীজায নিষ্প্রপঞ্চায মাযিনে

মাযাপনোদকাযাস্তু শ্রী নৃসিংহায মঙ্গळম্ ॥ ১২॥

সংতান দান দীক্ষায সংতানায ফলার্তিনাম্

কৌসল্যা মুখ্য সংতানরূপিণে শুভমঙ্গळম্ ॥ ১৩॥

মঙ্গळম্ নরসিংহায মঙ্গळম্ গুণসিংধবে

মঙ্গळানাম্ নিবাসায যাদাদ্রীশায মঙ্গळম্ ॥ ১৪॥

॥ ইতি শ্রী বাংগীপুরম্ নরসিংহাচার্য বিরচিতং

শ্রী যাদগিরি লক্ষ্মীনৃসিংহ মঙ্গল৹াশাসনম্ সমাপ্তম্ ॥

Encoded and proofread by Venkata N Vangeepuram

vangeepuram@rediffmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Yadagiri Lakshmi Narasimha Mangalasasanam Lyrics in Bengali PDF
% File name : yAdagirilaxminRisimhamangala.itx
% Location : doc_vishhnu
% Author : vA.ngIpuram narasi.nhAchArya
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Venkata N Vangeepuram vangeepuram at rediffmail.com
% Proofread by : Venkata N Vangeepuram vangeepuram at rediffmail.com Great grandson of the composer
% Latest update : December 15, 2004
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.

This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website